**दिनाङ्कः 03.03.2026** **प्रातः - 06:55**

**पीएम-यूएस प्रेस**

प्रधानमन्त्री नरेन्द्रमोदी अमेरिकादेशस्य राष्ट्रपतिना डोनाल्डट्रम्प इत्येतेन सह दूरभाषमाध्यमेन संवादम् आचरितवान् घोषणां च अकरोत् यत् भारते निर्मितेषु उत्पादेषु शुल्कम् अष्टादश-प्रतिशतमितात् न्यूनं भविष्यति। सामाजिकसञ्चारपटले एकस्मिन् लेखे श्रीमोदी लिखितवान् यत् यदा अर्थव्यवस्थाद्वयं विश्वस्य बृहत्तमं लोकतन्त्रं च मिलित्वा कार्यं कुर्वन्ति, तदा अनेन जनेभ्यः लाभः भवति अथ पारस्परिकरूपेण लाभप्रद-सहयोगाय अवसराः उद्घाटिताः भविष्यन्ति। असौ अस्यै घोषणायै भारतस्य चतुर् दशांशोत्तर एकार्बुदमितानां जनानां पक्षतः राष्ट्रपतये ट्रम्प् वर्याय कृतज्ञतां प्रकटितवान्। असौ कथितवान् यत् भारतं शान्त्यै तस्य प्रयत्नान् पूर्णतया समर्थयति।

**जयशंकर**

विदेशमन्त्री डॉ. एस् जयशङ्करः प्रधानमन्त्रिणः नरेन्द्रमोदिनः अमेरिकादेशस्य राष्ट्रपतेः डोनाल्ड्-ट्रम्प इत्येतस्य च मध्ये जातस्य संवादस्य अनन्तरं द्विपक्षीयव्यापारविषये कृतानां घोषणानां स्वागतम् अकरोत्। सामाजिकसञ्चारपटले एकस्मिन् सन्देशे डॉ. जयशङ्करः लिखितवान् यत् अनेन अत्यधिकाजीविकाः उत्पन्नाः भविष्यन्ति, विकासः इतोऽपि वर्धिष्यति, द्वयोः अर्थव्यवस्थयोः नवाचारमपि वर्धिष्यति। असौ उक्तवान् यत् अनेन मेक-इन-इण्डिया इत्येतस्मिन् दिशि प्रयत्नाः सुदृढाः भविष्यन्ति, प्रौद्योगिकसम्बन्धाः प्रोत्साहिताः भविष्यन्ति इति।

**बीजेपी**

भारतीयजनतापार्टीति दलं मणिपुरे विधायक दलस्य नेतुः निर्वाचनाय दलस्य राष्ट्रियमहासचिवस्य तरूण चुघ इत्येतस्य केन्द्रीय-पर्यवेक्षक-रूपेण नियुक्तिम् अकरोत्। इयं नियुक्तिः भाजपासंसदीयमण्डलेन कृता।

**भारतीय राजदूत**

अमेरिकायां भारतीयराजदूतः विनयमोहनक्वात्रा उक्तवान् यत् भारत-अमेरिका-व्यापार-सहमतिः प्रधानमन्त्रिणः नरेन्द्रमोदिनः अमेरिकादेशस्य राष्ट्रपतेः डोनाल्ड ट्रम्प इत्येतस्य च पारस्परिक-सहयोगाय विजयरूपेण वर्तते। सामाजिकसञ्चारपटले एकस्मिन् सन्देशे असौ लिखितवान् यत् व्यापारसहमतिः द्वाभ्याम् अर्थव्यवस्थाभ्यां द्वयोः देशयोः जनेभ्यश्च नूतनावसराः उद्घाटयति।

**गोवा**

नेशनल बुक ट्रस्ट इत्येतेन संस्थानेन गोवाप्रशासनस्य समर्थ युवा फाउण्डेशन इत्येतस्य च सहयोगेन ह्यः आधिकारिकरूपेण अस्य वर्षस्य गोवापुस्तकमहोत्सवस्य घोषणा कृता। गोवापुस्तकमहोत्सवः श्वः आरप्स्यते अथ अस्य मासस्य अष्टदिनाङ्कं यावत् कैम्पल ग्राउण्ड इत्यत्र प्रचलिष्यति। मुख्यमन्त्री डॉ. प्रमोदसावंतः अस्य कार्यक्रमस्य उद्घाटनं करिष्यति। यत्र शतप्रकाशकानां द्विशताधिकप्रदर्शनीभिः सह एका विशालसाहित्यिक -प्रदर्शनी अपि भविष्यति। महोत्सवे सचिन-पिलगांवकरः, मृणाल कुलकर्णी, आचार्यप्रशान्तः सदृशाणां प्रख्यातवक्तृणां एका शृङ्खला अपि आयोजयिष्यते।

**क्रिकेट**

विमेन्स्-प्रीमियरलीग क्रिकेट्क्रीडायां गुजरात-जायंट्सदलम् अद्य वडोदरायाः कोटाम्बीस्थले बीसीए-प्राङ्गणे दिल्लीकैपिटल्स्दलं सम्मुखीकरिष्यति। स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते। अस्यः स्पर्धायाः विजेतृदलं गुरुवासरे निर्णायकचक्रे रॉयलचैलेञ्जर्सबेङ्गलुरुदलं सम्मुखीकरिष्यति।

**।।इति वार्ताः।।**